शिखण्डिका, स्त्री, शिखा । यथा,—
"चूड़ा केशी केशपाशी शिखा शिखण्डिका समाः ॥"
इति हेमचन्द्रः ॥

शिखण्डिनी, स्त्री, (शिखण्डश्चूड़ा अस्त्यस्या इति । इनि । ङीप् ।) यूथिका । गुञ्जा । इति मेदिनी ॥ द्रुपदराजकन्या । (यथा, महाभारते ।५।१८९।२
"कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः ॥")
सा यत्तस्य पुंस्त्वपरुषेण पुरुषो भूत्वा शिखण्डीति नाम्ना ख्यातः । एतद्विवरणं महाभारते । ५ । १९० अध्यायमारभ्य विशेषतो द्रष्टव्यम् ॥ मयूरी । शिखण्डिन्-शब्दात् स्त्रियां ईप्रत्ययेन निष्पन्ना ॥ (विजिताश्वराजस्त्री । यथा, भागवते । ४ । २४ । ३ ।
"अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम् ॥"
शिखण्डविशिष्टा । यथा, महाभारते । ४ । १५ । १ ।
"सा प्राद्रवत् काञ्चनमाल्यधारिणी
ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी ।
सुदक्षिणा वेदिविलग्नमध्या
सा पद्मपत्राभनिभा शिखण्डिनी ॥")

शिखण्डी, [न्] पुं, मयूरपुच्छः । गाङ्गेयारिः । स तु द्रुपदराजपुत्रः । (अस्य जन्मादिविवरणं महाभारते । ५ । १९० अध्याये द्रष्टव्यम् ॥ ) मयूरः । इति मेदिनी ॥ ( यथा, रघुः ।१।३९ ।
"षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः ॥")
कुक्कुटः । बाणः । इति हेमचन्द्रः ॥ गुञ्जा । स्वर्णयूथिका । इति राजनिर्घण्टः ॥ विष्णुः । यथा । शिखण्डी नहुषो वृषेति तस्य सहस्रनामस्तोत्रम् ॥ ( शिवः । यथा, महाभारते । १३ । १७ । ३१ ।
"जटी चर्म्मी शिखण्डी च सर्व्वाङ्गः सर्व्वभावनः ॥"

शिखर, क्ली, शिखास्यास्तीति । "वुञ्छण्कठजिति ।" ४ । २ । ८० । अश्मादित्वात् रः ह्रस्वश्च ।) पर्व्वताग्रम् । तत्पर्य्यायः । कूटम् २ शृङ्गम् ३ । इत्यमरः ॥ शैलाग्रदेशकम् ४ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १ । १८ । २८ ।
"विदारयन् गिरिशिखराणि पत्रिभिः ॥")

शिखरः, पुं क्ली, (शिखास्त्यस्येति । शिखा + रः । ह्रस्वश्च । ) वृक्षाग्रम् । तत्पर्य्यायः । शिरः २ । अग्रम् ३ । इत्यमरः ॥ शिरम् ४ । इति शब्दरत्नावली ॥ प्राग्रम् ५ । इति राजनिर्घण्टः ॥ पर्व्वतशृङ्गम् । पुलकः । कक्षः । पक्वदाड़िमबीजाभमाणिक्यम् । सकलाग्रम् । इति मेदिनी ॥ कोटिः । इति त्रिकाण्डशेषः ॥

शिखरवासिनी, स्त्री, (शिखरे वसतीति । वस + णिनिः । ङीप् ।) दुर्गा । इति त्रिकाण्डशेषः ॥

शिखरा, स्त्री, मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखरिणी, स्त्री, रसाला । वृत्तभेदः । नारीरत्नम् । मल्लिका । रोमावली । इति मेदिनी ॥ वृत्तभेदो यथा—
"रसै रुद्रैश्छिन्ना य-म-न-स-भला गः शिखरिणी ।
करादस्य भ्रष्टे ननु शिखरिणी दृश्यति शिरोविलीनाः स्युः सत्यं नियतमवधेयं तदखिलैः ।
इति त्रस्यद्गोपातुचितनिश्चितालापजनितं
स्मितं बिभ्रत् देवो जगदवतु गोवर्द्धनधरः ॥"
इति छन्दोमञ्जर्य्याम् २ स्तवकः ॥
नवमालिका । द्राक्षाविशेषः । इति राजनिर्घण्टः ॥ मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखरी, [न्] पुं,(शिखरोऽस्यास्तीति । शिखर + इनिः ।) पर्व्वतः । ( यथा, गीतायाम् । १० । २३ ।
"वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥")
वृक्षः । अपामार्गः । इति मेदिनी ॥ कोट्टः । कोयष्टिः । इति हेमचन्द्रः । वन्दाकः । कर्कटशृङ्गी । कुन्दुरुकः । यावनालः । इति राजनिर्घण्टः ॥ ( कोटिविशिष्टे, त्रि । यथा, महाभारते । १ । ७४ । ४ ।
"दन्तैः शुक्लैः शिखरिभिः सिंहसंहननो महान् ॥")

शिखलोहितः, पुं, वृक्षविशेषः । इति शब्दचन्द्रिका ॥ कुकुरसुडा इति भाषा ॥

शिखा, स्त्री, ( शी + "शीङो ह्रस्वश्च ।" उणा० ५ । २४ । इति खः ह्रस्वो गुणाभावश्च । स्त्रियां टाप् । ) अग्निज्वाला । तत्पर्य्यायः । ज्वालः २ कीलः ३ अर्चिः ४ हेतिः ५ शिखा ६ । इत्यमरः ॥ ( यथा, माघे, । १ । २० ।
"विदिद्युते वाड़वजातवेदसः
शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥")
पिण्डितशिखाग्नेः शुभसूचकत्वं यथा, वायुपुराणे ।
"प्रदक्षिणान् पिण्डितशिखः सर्पिःकाञ्चनसन्निभः
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये ॥"*॥
अग्नेरशुभलक्षणं यथा । ब्रह्मपुराणे ।
"अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठेषु सम्पन्ने फुत्कारवति पावके ॥
कृष्णार्च्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ।
आहुतीर्जुहुयात् यस्तु तस्य नाशो भवेत् ध्रुवम् ॥"
इति तिथितत्त्वम् ॥*॥
शिरोमध्यस्थकेशः । तत्पर्य्यायः । चूड़ा २ केशपाशी ३ । इत्यमरः ॥ जुटिका ४ जूटिका ५ । इति शब्दरत्नावली ॥ केशी ६ शिखण्डिका ७ इति हेमचन्द्रः ॥ * ॥ गायत्र्या शिखाबन्धनं यथा,—
"गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः
जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत् ॥"*
शूद्रस्य शिखाबन्धे मन्त्रो यथा,—
"ब्रह्मवाणीसहस्राणि शिववाणीशतानि च ।
विष्णोर्नामसहस्रेण शिखाबन्धं करोम्यहम् ॥"*
शिखामोचनमन्त्रो यथा,—
"गच्छन्तु सकला देवा ब्रह्मविष्णुमहेश्वराः ।
तिष्ठत्वत्राचला लक्ष्मीः शिखामुक्तं करोम्यहम् ॥"*॥
शिखाबन्धनानन्तरमाचमनं यथा,—
"निबद्धशिख आसीनो द्विज आचमनं चरेत् ।
कृत्वोपवीतं सव्येऽंशे वाङ्मनःकायसंयतः ॥"*
मुक्तशिखस्याचमने दोषो यथा,—
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा
अकृत्वा पादयोः शौचं आचान्तोऽप्यशुचिर्भवेत् ॥"
इति आह्निकतत्त्वम् ॥*॥
शाखा । बर्हिचूड़ा । (यथा, महाभारते । १३ । २८२ । ५३ ।
"रम्भागतमथाश्वानां शिखोर्द्ध इव बर्हिणाम् ॥"
लाङ्गलिकी । अग्रमात्रम् । (यथा, भागवते । ३ । १३ । ४४ ।
"सटाशिखोद्धूतशिवाम्बुबिन्दुभिः ॥" )
चूड़ामात्रम् । प्रपदम् । इति मेदिनी ॥ प्रधानम् । शिफा । तृषिः । इति हेमचन्द्रः ॥(यथा, कथासरित्सागरे । २१ । ८५ ।
"स्फुरद्रत्नशिखाजालं धात्रा मोहतमोपहम् ॥")
स्मरज्वरः । इति शब्दरत्नावली ॥

शिखाकन्दं, क्ली, ( शिखायुक्तः कन्दो यस्य । ) गृञ्जनम् । इति राजनिर्घण्टः ॥

शिखाण्डकः, पुं, काकपक्षः । इति हेमचन्द्रः ॥

शिखातरुः, पुं, ( शिखायाः दीपशिखायास्तरुरिव । )दीपवृक्षः । इति त्रिकाण्डशेषः ॥ पिलसुज इति भाषा ॥

शिखाधरः, पुं, (शिखाया धरः । ) मयूरः । इति शब्दमाला ॥ मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

शिखाधारः, पुं, (शिखां धरतीति । धृ + अण् ।) मयूरः । इति शब्दरत्नावली ॥

शिखामूलं, क्ली, (शिखायुक्तं मूलं यस्य ।) गृञ्जनम् । इति राजनिर्घण्टः ॥

शिखालुः, पुं, मयूरशिखा । इति राजनिर्घण्टः ॥

शिखावती, स्त्री, (शिखा विद्यतेऽस्याः । शिखा + मतुप् । मस्य वः । स्त्रियां ङीप् । ) मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखावरः, पुं, (शिखा विद्यते अस्य । शिखा + "दन्तशिखात् संज्ञायाम् ।" ५ । २ । ११३ । इति वलच् । रस्य लत्वम् । ) पनसवृक्षः । इति शब्दमाला ॥

शिखावलः, पुं, ( शिखा विद्यतेऽस्य । शिखा + "दन्तशिखात् संज्ञायाम् ।" ५ । २ । ११३ । इति वलच् ।) मयूरः । इत्यमरः ॥ (शिखावलनगरम् । शिखावला स्नुषा । इति काशिका ॥)